# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-2(SEM-4) | **प्रश्नपत्रम् - ३** (New & Old) | **गुणाः** - ७० |
| **विषयः** - वास्तुशास्त्रम् | **कोड- CC- 5411** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - १/०४/२०१९ | **सन्दर्भग्रन्थः**- मयमतम् | |

---

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ अधोलिखितयोः कस्यचिदेकस्य सान्वयं व्याख्यां कुरुत ।** **०५**

१ अङ्कुरादीनां भवनं सेनेशानां हि तत्रैव ।
विश्वनृपैश्वरभवनं मध्ये वासं त्रिभागेषु ॥

२ मध्यद्वारं तु देवानां द्विजानामवनीभृताम् ।
शेषाणामपि सर्वेषामुपमध्यं विधीयते ॥

**प्रश्नः २ वास्तुपदमण्डलाधारेण द्वारस्थापनविचारं स्पष्टयत ।** **१०**

अथवा

**राजवेश्मतलविधानं ग्रन्थाधारेण दर्शयत ।**

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ अधोलिखितयोः कस्यचिदेकस्य सान्वयं व्याख्यां कुरुत ।** **०५**

१ गुल्फायामसुपट्टैर्मतिभिः पट्टैस्तु कीलकं कुर्यात् ।
एवं प्रोक्ता शिबिका पैठिका नाम चित्राङ्गा ॥

२ त्रिवितस्तिकृतव्यासं पञ्चवितस्यायतं च शयनं स्यात् ।
वितारायामाभ्यां त्रिः पञ्चममात्रमधिकं ज्येष्ठम् ॥

**प्रश्नः ४ लिङ्गनिर्माणे शुभशिलालक्षणं दर्शयत ।** **१०**

अथवा

**पीठमानतः प्रासादमानानि ग्रन्थाधारेण दर्शयत ।**

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ अधोलिखितयोः कस्यचिदेकस्य सान्वयं व्याख्यां कुरुत ।** **०५**

१ यावद्घनतां यान्ति यावत्सौम्यप्रयोज्यानि ।
यावत्तदेव धीमन्नवतां प्रकर्तुमिच्छति चेत् ॥

२ ब्रह्मादीनां च विन्यासं देवीनां वर्णमायुधम् ।
वाहनं भूषणं केतुर्विमानं वक्ष्यते क्रमात् ॥

**प्रश्नः ६ महेश्वरस्य प्रतिमानिर्माणविधानं वर्णयत ।** **१०**

अथवा

**बेरजीर्णोद्धारविधानं प्रदर्शयत ।**

**॥ चतुर्थान्वितिः ॥** (Unit-4)

**प्रश्नः ७ अधोलिखितयोः कस्यचिदेकस्य ससन्दर्भं व्याख्यां कुरुत । ०५**

१ लेखारूपाः स्वरूपाश्च नागाः सप्तत्रिभोगिकाः ।
राक्षसाश्च पिशाचाश्च रौद्रप्रकृतिरूपिणः ॥

२ द्विगुणं तु तदुत्सेधं जङ्गमे लिङ्गमानतः ।
पूजाभागोदयार्धं वा त्रिभागं तत्समोदयम् ॥

**प्रश्नः ८ द्वारपालानां प्रतिमानिर्माणविधानं दर्शयत । १०**

अथवा

**जङ्गमबेरमानानि ग्रन्थाधारेण दर्शयत ।**

**प्रश्नः ९ निम्नाङ्कितेषु दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ नन्दीद्वारपालस्य स्थापना कस्यां दिशायां करणीया?

२ पार्वत्याः दृष्टिः कीदृशी निर्मापणीया?

३ भूमिदेव्याः स्वरूपं कीदृशम्?

४ सरस्वत्याः वर्णः कः?

५ गृहेषु पूज्यायाः लक्ष्मीदेव्याः भुजाः कति?

६ वाराही देवी वरदाभयहस्ता भवति न वा?

७ 'अनुकर्म' इत्युक्ते किम्?

८ स्वयम्भूलिङ्गे मानाधिके दोषाः भवन्ति न वा?

९ सर्वतोभद्रलिङ्गं केषां वर्णानां कृते शुभं भवति?

१० वृद्धशिलालिङ्गनिर्माणं शुभम् अशुभं वा?

११ लिङ्गभेदाः कति? के च ते?

१२ शयननिर्माणे आयविचारः क्रियते न वा?

१३ शिबिकायाः प्रकाराः कति? के च ते?

१४ भद्रसुन्दरगोपुरे नासिकायुक्ता सौष्ठिका भवति न वा?

१५ अश्वशालायां कति द्वाराणि भवन्ति?

०००